International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(6): 165-168
© 2019 IJSR
www.anantaajournal.com
Received: 22-09-2019
Accepted: 24-10-2019

**गौराङ्ग मुखार्जी**
श्रीसदाशिवपरिसरः,पुरी
राष्ट्रियसंस्कृतसंस्थानम्,
न्यू.दिल्ली, भारत

**Corresponding Author:**
**गौराङ्ग मुखार्जी**
श्रीसदाशिवपरिसरः,पुरी
राष्ट्रियसंस्कृतसंस्थानम्,
न्यू.दिल्ली, भारत

# संस्कृतशास्त्रेषु सर्जनात्मकतायाः अवधारणा

## गौराङ्ग मुखार्जी

**सारांशः**
आधुनिके विश्वे मानवाः समस्यापीडिताः सन्ति। समस्यायाः समाधानाय मानवाः सदा प्रयतमानाः वर्तन्ते। परन्तु तथापि समस्या नापगता। एतासां समस्यानाम् अपाकरणम् यया शक्त्या सम्भवति सैव सर्जनात्मकता। मानवेषु विशेषगुणरूपेण इयं शक्तिः विराजते। सर्जनात्मकतायाः बह्व्याः परिभाषाः उपलभ्यन्ते। वैदेशिकाः सर्जनात्मकताविषये बहु अध्ययनम् अकुर्वन्। परन्तु न केवलं वैदेशिकाः अपि च अस्माकं संस्कृतपण्डिताऽपि सर्जनात्मकताया अवधारणा अवर्णयत्। संस्कृतशास्त्रेषु बहुषु स्थानेषु सर्जनात्मकतायाः दृष्टान्तं वर्णितमस्ति। तदेव सोदाहरणं प्रतिवेदनेऽस्मिन् वर्णितमस्ति।

**कूटशब्दाः** सर्जनात्मकता, समस्या समाधानम्, सर्जनात्मकगुणः, संस्कृतशास्त्रम्।

## प्रस्तावना

योऽसावतीन्द्रियग्राह्यः सूक्ष्मोव्यक्तिः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्वधौ।। [1]

मनुसंहितायां मनुना अनेन प्रकारेण सृष्टिरहस्यवर्णनकाले कथं सृष्टिकर्ता स्वयमुत्पन्नोऽभवत् तद्विषये प्रतिपादितमस्ति। जगत्सृष्टेः प्रागेव सृष्टिकर्ता स्वयमुत्पन्न जातः। तदनन्तरमेकादनेकं भवितुं सोऽस्य विश्वस्य तथा च प्राणिनां सृष्टिं स्वसर्जनात्मकतया अकारि। तदर्थमुच्यते मनुना-

[1].मनुसंहिता, प्रथमाध्याये सप्तमः श्लोकः। (१.७)

सोऽभिध्याय शरीरात्सर्वात्ससृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत्।। [2]

ईश्वरसृष्टजगति मानवाः स्ववलेन जगतः उन्नतिसाधनकार्ये साफल्यमलभत्। प्रायः सर्वेषु स्तरेषु मानवानां प्रगतिः परिदृश्यते। अधुना मानवाः विज्ञानबलेन महाकाशपर्यन्तं गन्तुं तथा च ततः विज्ञानसम्बन्धितानि तथ्यानि अपि पृथिव्यां प्रेषयितुं शक्नुवन्ति। विज्ञानबलेन मानवा असाध्यं साधयन्तीदानीम्। अधुना ज्ञातव्यमिदं यत् मानवानामेतादृशं साफल्यं न केवलं विज्ञानकारणात्, अपि च तेषां सर्जनात्मकतायाः प्रभावे समभवत्। यथा प्रजापतेः ब्रह्मणः सर्जनात्मकता जगत्सृष्टेः कारणभूता, तथा हि विश्वस्य प्रगतिः मानवस्य सर्जनात्मकताबलादेव भवति।

**सर्जनात्मकता**

इदानीं वयं जानीमः का नाम सर्जनात्मकता? सर्जनात्मकता विशेषगुणरूपेण मानवे तिष्ठति। सः गुणः केषुचित् विकसति, केषुचित् न। सर्जनात्मकतया मानवः किमपि नूतनं आविष्करणं सृष्टिं वा करोति। यद्यपि सर्जनात्मकतया सह आविष्कारस्य तादात्म्यसम्बन्धोऽस्ति तथापि एतदपि वक्तुं शक्नुमः यत् सर्जनात्मकता नाम समस्यासमाधानशक्तिः। अद्यत्वे समस्याग्रस्तजटिलसमाजे तथा प्रतियोगितापूर्णसंसारे सर्जनात्मकव्यक्तेः आवश्यकता सुतरामनुभूयते। प्रकृतौ सर्जनात्मकशक्तिः मानवानां कृते मङ्गलकारिणी भवति। मानवेषु उत्तममानवत्वं सम्पादयितुं सर्जनात्मकता एव अत्यावश्यकी अस्ति। येषु मानवेषु सर्जनात्मकता भवति ते समाजे शीर्षस्थानीयाः रूपेण पूज्यन्ते। पुरा मानवानां चिन्तनमासीत् यत् सर्जनात्मकता क्वाचित् दैवीशक्तिरिति। अधुना शिक्षाशास्त्रिभिः एतद् प्रमाणितं यत् सर्जनात्मकता दैवीशक्तिः नास्ति। मानवेषु निहितैः चिन्तनैः सर्जनात्मकता उत्पद्यते। महान् मनोवैज्ञानिकः बिनेमहोदयः एवं व्यक्ती करोति यत् कश्चन काष्ठेन वस्तूनि निर्माति, कश्चन सुन्दरं चित्रं निर्माति, पुनः कश्चन मूर्तिं निर्माति। एतेषां जनानां चिन्तनस्यापि अभिन्नः सम्बन्धः वर्तते।

सृष्टेः सर्वविधेषु आविष्कारेषु सर्जनात्मकता परिलक्ष्यते। कलाकार्यं सर्जनात्मकतायाः प्रयोगरूपेण वरीवर्ति एव। सर्वविधकार्येषु सर्जनात्मकतायाः महत्वमवलोक्यते। सभ्यतायाः संस्कृतेश्च परिप्रकाशे सर्जनात्मकतायाः प्रच्छन्नरूपं दृश्यते। यदि कस्यचित् जनस्य अत्यावश्यककार्ये प्रत्यक्षतया सृजनात्मकता नैव परिदृश्यते तर्हि तस्य दैनन्दिनकार्ये उत्पादितां समस्यां दूरीकर्तुं न शक्यते। किमर्थमित्युक्ते सर्जनात्मकचिन्तनं विनैव समस्यायाः समाधानं न सम्भवति। अतः सर्जनात्मकता केवलं दैवीशक्तिः न। अनया मानवः नूतना सर्जनात्मकतामर्जितुमपि शक्नोति।

**सर्जनात्मकतायाः परिभाषा**

'Creativity' इति शब्दः लाटिनभाषाः 'Creatus' इति शब्दात् आगतः, यस्यार्थो भवति 'to bring into being' इति। सरलतया अस्यार्थो भवति अपूर्वं मौलिकं नूतनं वा किमपि सृजनमिति। यत् अविद्यमानमस्ति तत् कल्पनमेवं सृजनं भवति। अस्मिन् विषये Foster महोदयः वदति-".........it is like letting down a bucket into the subconscious and bringing up things you did not know that you knew, and mixing them with things of ordinary day life that you do know."[3]

अर्थात्-इयं सा प्रक्रियास्ति यस्याम् अवचेतनमनसि केनचित् पात्रप्रवेशेन अज्ञातविषयस्य बहिरानयनं क्रियते। तेन सह जीवनस्य सामान्यविषयाणां ज्ञातज्ञानानां सम्बन्धं स्थाप्यते।

संस्कृते सर्जनमिति शब्दः सृज-विसर्गे इत्यस्मात् धातोः निष्पन्नोः भवति। प्रकृतौ सर्जनात्मकताया

[2] .मनु, प्रथमाध्याये अष्टमः श्लोकः। (१.८)

[3].WWW. Creativeresearch. com

अयमेवार्थः कर्तुं न शक्नुमः। जनाः सर्जनात्मकताया विविधाः संज्ञा ददाति। केचन बुद्धिरेव सर्जनात्मकता इति कथयन्ति। परन्तु केवलं बुद्धिरिति सर्जनात्मकता न भवति।

सर्जनात्मकतायाः संज्ञा का प्रसङ्गे Guilford महोदयेनोच्यते, "Creativity means a pattern of traits that are characteristics of Creative person."[4]

अर्थात् सर्जनात्मकता व्यक्तौ विद्यमानः कश्चन गुणः किञ्चन सामर्थ्यं वा।

Dehan & Havinghwest कथयतः यत्- Creativity is the quality which leads to the production of something new and desirable. The new individual who creates it." [5] अस्यार्थोऽस्ति-सृजनात्मकता सा विशेषशक्तिरस्ति या कस्यापि नूतनवस्तुनः उत्पादनाय प्रेरयति। तद्वस्तु सम्पूर्णसमाजस्य कृते तथा च वस्तुनिर्मातुः कृते नूतनं भवति।

Torrance महोदयः सर्जनात्मकताविषये बह्वध्ययनकरोत्। अस्य महोदयस्य अभिमतमस्ति- "Creativity is a process of becoming sensitive to Problems, deficiencies, gaps in knowledge, missing elements and soon. Sesrching for, solutions, making guesses or formulating hypotheses and possibly modifying and testing them and finally communicating the results."[6]

अर्थात् सर्जनात्मकता समस्यां प्रति अभिगन्तुमेका प्रक्रियास्ति। इयं न केवलं समस्याभिमुखी अपि च अभावाभिमुखी वर्तते। एवञ्च ज्ञानाय दूरत्वस्य लुप्तोपादानस्याभिमुखी चास्ति। सर्जनात्मकता नाम समाधानान्वेषणम्, अनुमानकरणं, प्राक्कल्पनानिर्माणम्। सम्भावनानुसारं परिवर्धितं, पुनः परीक्षणं एवञ्चान्ते परिणामस्य प्रकटनमित्यस्ति।

**संस्कृतशास्त्रेषु सर्जनात्मकता**

वैशिष्य्येन संस्कृतवालये वैदिककालादारभ्य आधुनिककालपर्यन्तमुपलब्धेषु कृतिषु सर्जनात्मकतायाः उल्लेखोऽस्ति। वेदेषु बहूनि संवादसूक्तानि उपलभ्यन्ते । तेषु संवाद- सूक्तेषु कुत्रचित् गुरुशिष्ययोः मध्ये वार्ता उपलभ्यते। तत्र गुरोः प्रश्नकरणशैल्या शिष्यस्य सर्जनात्मकतायाः विकासः भवति इति भाति। तैत्तिरीयोपनिषद् प्रभृतिषु क्रियाद्वारा सर्जनात्मकतायाः विकासः इति सिद्धान्तः उपलभ्यते। छान्दोग्योपनिषदि वर्णितेषु कथासु सत्यकामस्य कथा अस्ति। सत्यकामः स्वीयसर्जनात्मकताद्वारा अल्पीयसि काले आश्रमस्य गोसंरक्षणव्यवस्थायामुन्नतिम् आनीय चतुश्शतसंख्यापरिमिताः गावः सहस्रसंख्यापरिमिताः अकरोत्।

संस्कृतमहाकाव्येष्वपि सर्जनात्मकतायाः दृष्टान्तानि उपलभ्यन्ते। रामायणमहाभारते रामादीनामर्जुनादीनामभूतपूर्वा प्रतिभा परिदृश्यते। एतदेव सर्जनात्मकतायाः उदाहरणम्। गुरूं विना स्वीयाभ्यासेन धनुर्शिक्षा लब्धा एकलव्यः सर्जनात्मकतायाः परिचयं प्रयच्छत्। लङ्कागमनकाले प्रस्तरेण समुद्रोपरि वानरसेनया सेतुं निर्माय रामचन्द्रः स्वीयसर्जनात्मकतायाः परिचयं प्रयच्छत्। संस्कृतालङ्कारशास्त्रेष्वपि काव्यलक्षणकथनमाध्यमेन विलक्षणप्रतिभायाः उल्लेखो दृश्यते। संस्कृतसाहित्याचार्याः प्रायः सर्वे उद्घोषितवन्तः यत् प्रतिभा नाम सर्जनात्मकता। हेमचन्द्रः तस्य काव्यानुशासने कथयति -

> प्रतिभैव कवीनां काव्यकरणकारणम् ।
> व्युत्पत्त्यभ्यासौ तस्या एव संस्कारको न तु काव्यहेतुः॥ इति।

---

4.WWW.Psychological journal.com

5.उच्चतरशिक्षा मनोविज्ञान, एस.पी.गुप्ता., अलका गुप्ता।

6.WWW.Creativeresearch.com

तस्याशयः अस्ति सर्जनात्मकता एव काव्यसर्जने हेतुर्भवति।

मम्मटाचार्यः काव्यप्रकाशग्रन्थे निगदति - प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता इति । प्रतिभा सर्वदा नूतनविषयस्य चिन्तनस्य वा रचनां करोति इत्याशयः आचार्य-मम्मटस्य।

पण्डितराजजगन्नाथोऽपि तस्य रसगङ्गाधरग्रन्थे कथयन्ति काव्यरचनायाः कारण प्रतिभा एव - तस्य च कारणं कविगता केवला प्रतिभा इति। सा च प्रतिभैव सर्जनात्मकता।

पुनः काव्यप्रकाशे मम्मटाचार्यः उद्धरति यत् बुद्ध्या सह प्रतिभायाः सम्बन्धमस्ति-

> शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
> काव्याङ्गशिक्षणाभ्यास इति हेतुस्तदुद्भवे ॥
> इति।

काव्यमीमांसाकारः वदति प्रतिभा द्विधा भवति, यथा - कारयित्री भावयित्री च। मानवानामान्तरिकभावानां स्वाभाविकबहिरागमनमेव प्रतिभा। सा एव शक्तिनाम्ना ज्ञायते ।

इयं प्रतिभा केवलं मानवेषु भवति न तु सर्वप्राणिसाधारणे। एतदर्थं वाक्यपदीये भर्तृहरिणा उक्तं यत् -

> प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति ।
> समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्॥
> इति । (२.१७)

मम्मटाचार्यः कथयति प्रतिभा शक्तिरिति यया कवित्वबीजं जायते - शक्तिः कवित्वबीजरूपः संस्कारविशेषः इति। (का.प्र.१.३)

आचार्यः आनन्दवर्धनस्य आशयः अस्ति - यथा शक्त्या व्यङ्गार्थस्यावगमनं भवति सा शक्तिः प्रतिभा एव।

> सरस्वती स्वादु तदर्थवस्तु निःस्यन्दमाना महतां कवीनाम्।
> आलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥
> इति। (ध्व.लो.२.६)

अनेन संस्कृतालङ्कारिकाः प्रतिभायाः वर्णनं कृतवन्तः आसन् । वयं कथयितुं शक्नुमः एषा प्रतिभा एव सर्जनात्मकता। परन्तु साहित्यशास्त्रे वर्णिता इयं प्रतिभा सर्वमानवेषु विद्यमानप्रतिभायाः भिन्न एव भवति। संस्कृतक्षेत्रे शिक्षणाधिगमप्रक्रियायां परम्परया एव चाटुश्लोकैः सर्जनात्मकतायाः, प्रतिभायाः परीक्षणं क्रियमाणमासीत्।

## सन्दर्भ

1. अधिगम का मनोसामाजिक आधार एवम् शिक्षण-डॉ.एम.पराशरः, प्रो.एम.पी.सिन्हा त्यागी, एस.डी.शर्मा;अनु प्रकाशनम्, जयपुर, २००६।
2. काव्यप्रकाशः-मम्मटः, चौखम्बा संस्कृतसंस्थान, वाराणसी, २००३।
3. काव्यानुशासनम्-हेमचन्द्रः, चौखम्बा संस्कृत संस्थान, वाराणसी, २००३।
4. Creativity, गिलफोर्डः, अमेरिकान साइकोलजिस्ट,५.४४।
5. मनुस्मृतिः-मनु, चौखम्बा संस्कृत संस्थान, वाराणसी, २००३।
6. शिक्षा मनोविज्ञान-एम शकल पाण्डेय, अटलान्तिक पबलिशार्स, न्यू.दिल्ली, २००४।
7. शिक्षामनोविज्ञान (अडभन्सड)-डॉ.एस.पी.गुप्ता, अलका गुप्ता, शारदा पुस्तक भवन, इलाहाबाद, २००५.
8. अन्तर्जालः
9. www.psychological journal.com
10. www.creativeresearch.com